!! श्री हरिः !!

अवधविहारीसंस्कृतमहाविद्यालयः, रहीमपुरः, खगड़िया
अङ्गीभूतः
कामेश्वरसिंहदरभंगा संस्कृत विश्वविद्यालयः, द्वारबङ्गः।
शास्त्री-प्रतिष्ठा, द्वितीयखण्डः
विषयः-साहित्यम्, अनिवार्य
प्रथम-पत्रम्, अनिवार्य दर्शनम् म्

"तर्कसंग्रहः"
[ प्रत्यक्षपरिच्छेदः -न्यायबोधिनीसंवलितः ]

पृथिव्यादित्रिकं निरूप्य वायुं निरूपयति-

रूपरहितस्पर्शवान् वायुः। स द्विविधः। नित्योऽनित्यश्च नित्यः परमाणुरूपः। अनित्यः कार्यरूपः। पुनस्त्रिविधः- शरीरेन्द्रियविषयभेदात्। शरीरं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक्सर्वशरीरवर्ति। विषयो वृक्षादिकम्पनहेतुः। शरीरान्तःसञ्चारी वायुः प्राणः। स चैकोऽप्युपाधिभेदात् प्राणापानादिसंज्ञां लभते।

भावार्थः-

रूप से रहित हो और स्पर्शवाला हो, ऐसा द्रव्य वायु है। वह दो प्रकार का होता है- नित्य और अनित्य। नित्य वायु परमाणुरूप और अनित्य वायु कार्यरूप है। कार्यरूप अनित्यवायु पुनः तीन प्रकार के होते हैं- शरीर-इन्द्रिय और विषय। शरीरात्मक वायु वायुलोक में होता है। वायवीय इन्द्रिय त्वचा है, जो स्पर्श का ग्राहक है और समस्त शरीर में व्याप्त है। विषय के रूप में वायु वह है, जो वृक्षादि के कम्पन का हेतु बनता है। वह शरीर के अन्दर सञ्चरण करनेवाली विषयभूत वायु प्राण है।

वह प्राणवायु एक होता हुआ भी हृदय आदि उपाधि के भेद से पाँच प्रकार का होता है और प्राण-अपान-समान-व्यान और उदान संज्ञा को प्राप्त कर जाता है।

न्यायबोधिनी व्याख्या –

इतः पूर्वं पृथिव्यादीनि त्रीणि निरूपितानि, अनन्तरं मन्नंभट्टो वायुं निरूपयति– रूपरहितस्पर्शवान् वायुः।(रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणम्) रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणमिति अत्र सति-सप्तमी विशिष्टार्था, तथा च रूपरहितत्व-विशिष्टस्पर्शवत्त्वं वायोर्लक्षणमित्यर्थः।

एतदेव पुनः स्फुटतया व्याख्यातुमाह– सति सप्तम्या विशिष्टार्थकतया सामानाधिकरण्यसम्बन्धेन रूपत्वावच्छिन्नप्रतियोगिताकाभावविशिष्टस्पर्शवत्त्व वायोर्लक्षणम्-

अत्रायं भावः–

यस्याभावो भवति स प्रतियोगी कथ्यते। यस्मिन्नभावो भवति सोऽनुयोगी कथ्यते।यथा- भूतले घटो नास्ति इत्यत्र भूतले घटस्याभावः कथ्यते, तस्मात् घटः प्रतियोगी भूतलञ्चानुयोगि भवति।एवं यदा घटः प्रतियोगी तदा प्रतियोगिता घटनिष्ठा।अनुयोगि भूतलं वर्तते ऽतोऽनुयोगिता भूतलनिष्ठा।इमे एव प्रतियोगिता-ऽनुयोगिते पूर्वं नाममात्रेण सङ्केतिते लक्ष्यलक्ष्यता-वच्छेदकस्वरूपव्याख्यायाम्।

एवमेव रूपं नास्तीति रूपाभावस्य प्रतियोगिरूपम्"।प्रतियोगिता रूपनिष्ठा। यथा- लक्ष्यतावच्छेदकं पृथिवीत्वं तथैव यद्धर्मावच्छिन्न प्रतियोगी स धर्मः प्रतियोगितावच्छेदकः।

अत्र रूपवत्वधर्मावच्छिन्न: 'प्रतियोगी' वर्ततेऽतो "रूपत्वं" प्रतियोगितावच्छेदकम्।

यो धर्मो यस्या अवच्छेदक: सा तद्धर्मावच्छिन्ना। इति द्वितीयनियमेन- रूपत्वधर्म: रूपनिष्ठाया: प्रतियोगिताया अवच्छेदकस्तस्माद् रूपनिष्ठा प्रतियोगिता रूपत्व-धर्मावच्छिन्ना। प्रतियोगिताया निरूपक: अर्थात्- प्रयोजक "अभावो" भवति। नह्यभावज्ञानमन्तरा प्रतियोगिताया निरूपणं भवितुमर्हति; यतोहि तत्रैव प्रतियोगिता तिष्ठति यस्याभावो गृह्यतेऽत: सुतरामेतद् आयाति यत् अभाव: प्रतियोगिताया: प्रयोजक इति। तथा च प्रतियोगिताया निरूपकोऽभावो भवतीति सिद्धम्। एवं तस्मिन्नेव निरूपकत्वार्थे कप्रत्ययं विधाय 'प्रतियोगितानिरूपक' इत्यस्मिन्नर्थे 'प्रतियोगिताक': इति कथ्यते नव्यै:। म।

तथा चैतदायातं यत् रूपत्वावच्छिन्नप्रतियोगिताकोऽभावो रूपाभावशब्देन कथ्यते। तथा चैतादृशरूपाभावविशिष्टो य: स्पर्शस्तद्वत्वं वायोर्लक्षणम्। स्पर्शे रूपाभाववैशिष्ट्यं (युक्तत्वं) सामानाधिकरण्यसम्बन्धेन - अर्थात् - "यस्मिन्नाधिकरणे रूपाभावो भवति, तत्रैव चेत् स्पर्शो भवेत्, तदा स्पर्शो रूपाभावविशिष्टो भविष्यति सामानाधिकरण्यसम्बन्धेन, यथा - रूपाभावो वर्तते वायौ, तत्रैव स्पर्शोऽपि वर्तत इति रूपाभावविशिष्ट: स्पर्शो जात:। तथा च रूपत्वावच्छिन्नप्रतियोगिताकाभाव (रूपाभाव) विशिष्टस्पर्शवत्वं वायौ वर्तते इतितत्रोक्तलक्षणा-समन्वय:।

विशेषणांशानुपादाने - रूपरहितत्वविशेषणानुपादाने स्पर्शवत्त्वमात्रस्य लक्षणत्वे पृथिव्यादित्रिकेऽति-व्याप्तिः, तद्वारणाय विशेषणोपादानम्।

(वायव) तत्रापि स्पर्शवत्त्वस्य सत्त्वादिति भावः। तावन्मात्रोपादाने - विशेष्यांशोपादानस्य फलमाह - आकाशादावतिव्याप्तिवारणाय विशेष्योपादानम् इति शम्।